SRI RAVIVARMA SANSKRIT GRANTHAVALI NO. 15

BHESHAJA PADDHATI

THE SANSKRIT COLLEGE COMMITTEE
TRIPUNITHURA
1973

Editor:

K. ACHYUTHA PODUVAL
RETIRED PROFESSOR OF NYAYA
WARIAM ROAD, ERNAKULAM

Sub Editor:

C. K. RAMAN NAMBIAR
RETIRED PRINCIPAL
SANSKRIT COLLEGE, TRIPUNITHURA

INTRODUCTION.

History shows that Vagbhata, the author of "Ashtangahridaya" and "Ashtangasamgraha" travelled from his native land, Sind, the whole of India and being enamoured of the medicinal and herbal wealth of Kerala settled down there and trained eight Namboodiry disciples, the 'Ashtavaidyas' as they are called, in the art of healing diseases. Ayurveda being a branch of Atharvaveda Brahmins with a special aptitude for the subject and proficiency in Sanskrit were selected as disciples. They were taught the two texts in detail and trained in Panchakarmas, Rasayana treatment, surgery and midwifery These Ashtavaidyas, in turn, taught batches of disciples according to the Gurukula system, mainly Brahmins. As time advanced, other castes were also taught Ayurveda though not in the Gurukula System by the Prasishyas of the Ashtavaidyas. Several of these eminent physicians wrote books of their own both in Sanskrit and Malayalam, based on Ashtangahridaya, the works of their predecessors and their own experience.

"Bheshajapadhathy" is a short treatise on Ayurveda written by one Purushothaman Namboodiry, disciple of Sri Neelakantan Namboodiry of Killikkurussimangalam, near Lakkidi. The native place and other details of the author are obscure, but it is to be supposed that he was staying with his Guru and wrote the book under his directions and guidance. In the first verse he bows to his Guru and Lord Siva in the local temple for blessings. Before bowing to the Acharyaparampara in the next verse he pays homage to his Ishtadevatha, Lord Vishnu. In the last verse also he makes mention of Achyutha, his Ishtadevatha, by whose grace he got the power to write the book. He includes Vagbhata also in the Acharyaparampara and that indicates he is a Keralite as in other parts of India Charaka and Sushrutha are given

greater prominence than Vagbhata. In the last but one verse he says that the work is based upon Ashtangahridaya. A few slokas from this text and a few from the standard receipes prevalent in Kerala are reproduced as such. Verse No: 64 is a mixture of Sanskrit and Malayalam. In the manuscript got from the late Trikkovil Uzuthra Warier, a few Malayalam verses are seen, which too have been printed.

The author being a Sanskrit scholar with poetic talents has no difficulty to give vent to this technical subject in beautiful verses. Ashtangahridaya is the most concise Ayurvedic text dealing with all topics and it cannot be further summarised. Formerly students had to memorise all the 120 chapters of this text. Perhaps the author predicted the difficulty of the present-day students in memorising the whole book and condensed the more important parts in as few verses as possible into four small chapters.

The first, 'Rogavichara Khanda', comprising 64 verses contains 5 verses dealing with the composition of the human body, 8 verses dealing with the seven Prakrithis, 15 verses explaining the symptoms of the Thridoshas in equilibrium and out of equilibrium, 18 verses on names and symptoms of diseases and 15 verses on "Vikruthivijnaneeya". In short the fundamental principles of Ayurveda mentioned in Soothrasthana, the Sareera and Nidana Sthanams are included in this short chapter.

In the second chapter, "Bheshajavikalpa-Khandae" comprising 39 verses, the first 15 slokas are devoted to give the properties, Rasa, Veera, Vipaka and Prabhava of commonly used Dravyas and Dravas. Two are devoted on cooked articles of food. Dravyas are classified according to their Rasas and Gunas in another 11 verses. The preparation of Kashayas and other medicines is hinted in 3 slokas. In the next 8 verses "Swasthavritham", "Ritucharya", "Roganulpadaneeyam" and "Mathrasitheeyam" are concisely dealt with. Some important portions of Soothrasthanam and Kalpasthanam are thus included in this chapter.

In chapter three, "Kriyabhedakhanda", consisting of 31 Slokas the work of Doshas, Dhatus, and Malas are explained briefly. In the examination of the patient importance of "Doothadivijnaneeyam is stressed. The essence of Ayurvedic treatment, Langhana and Brimhana, Sodhana and Samana, the Panchakarmas and the Upakarmas are made mention of omitting details. Several chapters of Soothrasthanam and one in Sareeram are summarised here.

In the fourth chapter, "Upakramakhanda", consisting of 101 verses, the treatment of Kayikarogas is mentioned in the first 83 slokas, devoting 16 for fever, 4 for Raktapitha and allied diseases, 7 for bronchial troubles, 8 for Gulma and 8 for Leprosy. Original verses from Ashtangahridaya and commonly used receipes are included. The treatment of certain diseases is given in 1 or 2 verses only. Diseases above the neck are dealt with in 8 verses, and other diseases mentioned in Utharasthanam in another 8 slokas. Of course, necessary importance is not given to the treatment of several diseases, as the author appears to be in a hurry to complete the work. Verse 95 dealing with Hridroga is misplaced. It ought to have been printed soon after verse 35 or 36.

There are some printing mistakes, which ought to have been avoided. Still the work is one which needs publication for the benefit of students and physicians as it contains several descriptions in a nutshell clothed in beautiful verses which can be easily memorised. Similar endeavours on the part of physicians of repute should meet the light of day and be appreciated

TRIPUNITHURA,
January 21, 1966.

Panditharaj
Trikkovil Achyutha Warier

भेषजपद्धतिः

रोगविचारखण्डः

श्रीमङ्गलैकनिलय भिषजामधीशं
सर्वज्ञमात्मगुरुमप्यमृताशनानाम् ।
श्रीनीलकण्ठमभयप्रदमात्मभाजा-
मिच्छानुकूलफलदं गुरुमानतोऽस्मि ॥ १ ॥

श्रीशं पद्मभव प्रजापतिमह
वास्तोष्पतिश्चाश्विना-
वात्रेयादिमुनीश्वरान् कृतमहा-
तन्त्राग्निवेशादिकान् ।
आचार्यान् प्रणिपत्य वाहटमपि
श्रीनीलकण्ठं गुरुं
वक्ष्ये भेषजपद्धतिं गुणनिका-
सिद्ध्य गुरोराज्ञया ॥ २ ॥

रक्षाकर्म चिकित्सितं हि वपुषो
रक्षाष्टधा कायश-
ल्योर्ध्वाङ्गार्भकदेवताविषजरा-
बीजामयेभ्यो नृणाम् ।
अङ्गेष्वेषु शरीरगा ज्वरमुखा
वातादिजा व्याधयो
वक्ष्येऽतोऽत्र शरीरदोषविकृति-
व्याध्यौषधोपक्रमान् ॥ ३ ॥

देहः कर्मज आत्मनः प्रकृतिजैः
सत्त्वादिभिर्जायते
पञ्चप्राणमनोदशेन्द्रियमयो
भोगी च सूक्ष्मस्ततः ।
स्थूलश्शोणितशुक्लबीजगमहा-
भूतात्मकोऽसौ भवे-
दाहारादिसुखार्थदोऽप्यतिजडो
धर्मात्मको वा सताम् ॥ ४ ॥

सप्तत्वक्परिवेष्टितं वपुरिदं
दूष्यैः कलाधारजी-
वाक्षैरस्थिविशेषसन्धिगुणपे-
शीस्नावकूर्चादिभिः ।
स्रोतोमर्मसिराविभागधमनी-
जालोष्मसीमन्तका-
वर्तैर्निर्मितभौतिकं स्वगुणदो-
षात्मप्रकृत्या युतम् ॥ ५ ॥

तस्मिन् भूतमयेऽत्र खश्रवणश-
ब्दव्यक्तयोऽनन्तजा-
स्त्वक्स्पर्शश्वसनानिलाः पवनतो
रूपं दृगूष्माग्नयः ।
वह्नेः क्लेदकफौ रसश्च रसनं
तोयात् क्षितेर्घ्राणग-
न्धास्थीन्यात्मन इन्द्रियाणि जननं
चित्तश्च नानात्मना ॥ ६ ॥

वृत्तिर्वृद्धिरलोलभाववपुरु-
त्पत्ती रसात् सात्म्यतोऽ-
नालस्यश्च बलप्रभायुरथ स-
त्त्वादास्तिकत्वं मतिः ।

सद्वृत्तिश्शुचितार्जवश्च रजसो
मानातिवाङ्मत्सराः
कुड्डम्भास्तमसो विषादभयनि-
द्राज्ञाननिस्सत्त्वताः ॥ ७ ॥

देहे शुक्लं यत् स्थिरं पैतृकं त-
न्मांसं रक्तं मातृजं यन्मृदु स्यात् ।
श्लेष्मा सत्त्वो राजसं पित्तमाहु-
र्वायुर्ज्ञेयस्तामसस्तु प्रकृत्या ॥ ८ ॥

दोषैस्सप्त शरीरगाः प्रकृतयो
व्यस्तद्विसर्वैर्गुणै-
स्तावन्मानसगाश्च ताः प्रकृतयो
ह्यायुः परीक्षाश्रयाः ।
दोषाणां क्षयवृद्धिजा विकृतयो
रोगकमूलास्ततो
व्यस्तद्वन्द्वसमस्तजा इति पुन-
र्जात्यादयः सप्तधा ॥ ९ ॥

वातपित्तकफद्वन्द्वसर्वप्रकृतयः क्रमात् ।
हीनमध्योत्तमा निन्द्याः श्रेष्ठा ज्ञेयाः स्वलक्षणैः ॥ १० ॥

कान्तिसौभाग्यलावण्यस्मृतिबुद्धिबलौजसाम् ।
आयुर्विद्यार्थयशसां हीनमध्योत्तमादयः ॥ ११ ॥

वायुः पित्तकफाविति त्रय इमे
दोषा रसासृङ्मिषा-
मेदोस्थ्याह्वयमज्जशुक्लसहिताः
सप्त क्रमाद्धातवः ।

मूत्रस्वेदविशोमला अविकृता
दूष्याश्शरीराश्रया
वृद्धक्षीणतया त एव विकृता
देहक्षयं कुर्वते ॥१२ ।

स्वैः स्वैः कर्मभिरादिशेदविकृतिं
तेषां शरीरस्थितिं
स्वास्थ्यं वैकृतकर्मभिश्च विकृतिं
व्याधिं शरीरक्षयम् ।
वातादिक्षयमादिशेदविकृतैः
क्षीणैर्निजैः कर्मभिः
स्थानानां लघुशून्यतादिभिरथो
कर्माणि वक्ष्ये क्रमात् ॥ १३ ॥

उत्साहश्वसनोद्गमाक्षपटुता
चेष्टा च वेगो गति-
र्धातूनामिति मारुतस्य मृदुतो-
ष्मक्षुत्प्रभापक्तयः ।
धीमेधारुचिशौर्यदर्शनतृषः
पित्तस्य च श्लेष्मणः
शुद्धस्य स्थिरता क्षमा च दृढता
वृद्धिश्च सुश्लक्ष्णता ॥ १४ ॥

प्रीणनजीवनलेपस्नेहन-
धारणपूरणगर्भोत्पादाः ।
देहक्लेदनकेशविधारण-
धारणशक्तिर्धातुमलानाम् ॥ १५ ॥

वायोर्वृद्धस्य शैत्यं चललघुखरता-
रौक्ष्यसौक्ष्म्यं कृशत्वं
कार्ण्यं नेत्रे च मूत्रे त्वचि शकृति नखे
मूत्रविट्सङ्गशोषाः ।
शीतद्वेषोष्ण काङ्क्षे भृशविषमगति-
र्व्याधिवह्निस्वभावे-
ष्वोजोनिद्रेन्द्रियादिक्षयविरसकषा-
यास्यता दीनता च ॥ १६ ॥

पित्तस्य द्रवतीक्ष्णविस्रसरता
सस्नेहता सोष्मता
पीतत्वं नयनादिषु द्रवशकृ-
त्कट्वम्लतिक्तास्यता ।
शीतेच्छारतिपूतितालवणक-
ट्वम्लोष्णविद्वेषता-
स्तैक्ष्ण्यं व्याध्यनलस्वभावगतिषु
क्रोधोऽतितृट्क्षुच्छ्रमाः ॥ १७ ॥

मृत्स्नास्निग्धहिमस्थिरत्वगुरुता-
स्थौल्यं तनौ श्लक्ष्णता
मान्द्यं व्याध्यनलस्वभावगतिषु
श्वैत्यं दृगादौ मुखे ।
माधुर्यं रुचिरुष्णरूक्षकटुषु
स्त्रीकामता श्लेष्मणः
कर्माणि श्लथताऽरुचिर्बहुलता
विण्मूत्रनिद्रासु च ॥ १८ ॥

शेषाणामपि वृद्धिरत्र कफवत्
स्वेदास्रयोः पित्तव-
च्चास्थ्नो वायुवदाश्रयाश्रयितया
प्रायो विशेषाः पुनः ।
वृद्धेऽस्रे रुधिरामयाश्च पिशिते
स्थौल्यं तथालम्बता
मेदस्यस्थ्यधिकत्वमस्थ्न्यतिरति-
प्रीतिश्च शुक्लेऽश्मरी ॥ १९ ॥

विण्मूत्रेऽधिकता कृतेऽप्यकृतता
स्वेदे त्वतिस्वेदता
कुर्वन्त्यत्र मलाः स्वमार्गगमनं
रुध्वा तदीयामयात् ।
पूर्वे धातव आत्मतुल्यमपरं
क्षीणाश्च वृद्धास्तथा
वाताद्याः पुनरामयात् प्रकुपिताः
क्षीणाश्च देहक्षयम् ॥ २० ॥

रक्तस्यामयमूलतास्त्यपि न त-
द्दोषोऽस्रजाः पित्तजाः
तल्लिङ्गाः पुनरामलक्षणयुतात्
सामानिति व्यादिशेत् ।
आमत्वं पुनरग्निकर्मविरहो
द्भूतोऽथवातादिगो
वक्ष्येऽथामजदोषजामयगणान्
व्याप्तान् समस्तामये ॥ २१ ॥

अग्लानिर्बहुमूत्रता क्षुदरुचिः
स्तैमित्यतन्द्रीक्लमाः
शैत्यालस्यगुरुत्वशीफेजळता
विड्बन्धलालास्रुतिः ।
स्रोतोरोधबलक्षयाग्निसदनं
निष्ठीवनं मूढता
वायोस्तैक्ष्ण्यमपि ज्वरस्य कथिता-
न्यामस्य लिङ्गानि च ॥ २२ ॥

रुक्तोदव्यधमङ्गभङ्गमदन-
स्रंसग्रहाक्षेपकं
व्यायामाक्रमहर्षतर्षसुषिर-
स्पन्दप्रलम्बश्लथाः ।
व्यासस्तम्भविजृम्भभेदमथनो-
द्वेष्टप्रसुप्त्यल्पता
शोषोद्वर्तविमर्दनानि भयशो-
काद्याश्च वातामयाः ॥ २३ ॥

मूर्छामोहमदप्रलापसदना-
त्यूष्माल्पनिद्राक्लम-
स्वेदक्लेदविदाहशिथिल-
त्वास्रावपाकाम्लकाः ।
स्पर्शाद्यक्षमता भ्रमो ज्वरवमी-
कोतोत्कोपोद्गमः
पित्तास्रप्रमुखामयाश्च सकलाः
पित्तामयाः प्रायशः ॥ २४ ॥

तन्द्राजाल्यघनाङ्गता कठिनता
स्तैमित्यकण्डूक्लम-
स्वापालस्यविमर्दनादिसहता
हृल्लासकासारुचिः ।
लेपोदर्दविमर्दवह्निसदन-
श्वासप्रसेकाः कफ-
स्रावश्शोफरुगल्पतातिमलताः
श्लेष्मामयाः प्रायशः ॥ २५ ॥

दूष्यानुक्त्वा प्राकृतान् वैकृतांस्त-
द्दोषं व्याधीन् सर्वरोगानुबद्धान् ।
दोषैर्व्यस्तद्वन्द्वसर्वैः कृतांस्तान्
वक्ष्ये रोगान् जूर्तिमुख्यान् क्रमेण ॥ २६ ॥

जूर्त्यस्रश्वासयक्ष्मस्वररुचिवमिहृ-
त्तृण्मदार्शांसि वर्तो
विण्मूत्रोत्थाश्मवर्ध्माम्यदशपिटका-
शूलगुल्मोदराद्याः ।
पाण्डुः शोफो विसर्पः क्रिमिरुधिरमरु-
च्छ्वित्रकुष्ठामयास्ते
रोगा आगन्तवोऽन्ये वपुषि मनसि चा-
घातरागादिजा ये ॥ २७ ॥

उष्णोच्छोष्णशरीरता ज्वर इह
प्रायोऽत्र वातादयः
प्राप्याथाशयमामतोऽतिबलिनः
स्थानान्निरस्यानलम् ।

युक्तास्तेन तपन्ति गात्रमखिलं
तेनोष्णदेहो भवे-
दुष्णेच्छान्तरमूलवह्न्यबलतः
शीतातुराणां भवेत् ॥ २८ ॥

अस्रस्य स्रुतिरस्रपित्तमुदितं
स्थानाद्यकृत्प्लीहतो
रक्तं पित्तयुतं निजैस्समगुण-
र्दुष्टं द्रवं कोष्ठगम् ।
गच्छत्यूर्ध्वमधोमुखादिनवभि-
र्मार्गैरसृङ्मार्गतः
स्त्रीणान्तत् प्रदरश्च कालनियमा-
दन्यद्रजः कालजम् ॥ २९ ॥

अस्थिस्रावः सोमरोगोऽस्रपित्तं
स्त्रीणां पुंसां जायते मैथुनाद्यैः ।
योन्यः स्त्रीणां मेढ्रतो मानुषाणां
स्रावौ ज्ञेयौ श्वेतपूयात्मकौ च ॥ ३० ॥

कासस्तूर्ध्वगमारुतस्य गमनं
वक्त्रेण शब्दान्वितं
श्वासश्चोरसि चेद्गतस्य मरुतो
रुद्धस्य कृच्छ्राद्गमः ।
हिध्मा श्वासगभीरतैव सहिता
गम्भीरनादेन ते
चान्योन्यायतनात्मकास्त्रय इमे
श्वासामयाः केवलम् ॥ ३१ ॥

यक्ष्मा श्वाससपीनसस्वरशिरः-
पार्श्वांसविट्छर्दिरु-
ग्देहस्य क्षयता स्वरस्य सदनं
तद्भोजनेऽरोचकः ।
भुक्तस्योद्गमनं वमिस्तु हृदि हृ-
द्रोगश्च तृष्णा जले
मद्याद्यैश्च मदोदयोऽल्पबलिनां
मित्थ्यातिपानोद्भवः ॥ ३२ ॥

दुर्नामानि गुदे वलीषु विविधा
मांसाङ्कुराः स्युः शकृ-
द्रुध्वा तैरथ वातपित्तकफजाः
कुक्षौ भवेयुर्गदाः ।
उद्वर्तः पवनस्य चोर्ध्वगमनं
विण्मूत्रसङ्गोऽतिरु-
क्कोष्ठे हृद्यपि पार्श्वपृष्ठजठरे
वैषम्यमग्नेरपि ॥ ३३ ॥

अतिसारोऽतिविट्स्रावोऽत्राब्धातुविहतेऽनले ।
पुरीषं द्रवतां याति भूयो निस्सरति स्वयम् ॥ ३४ ॥

गृहण्याधारदोषेण विषमाद्यग्निभिर्युता ।
विमुञ्चति शकृत् पक्वमामं भुक्तेऽति वा न वा ॥ ३५ ॥

मूत्रे कृच्छ्रगतिस्तु कृच्छ्र उदितो
वस्तेर्मुखे चाश्मरी
दोषैश्शुक्रकृता च मूत्रमरुतो-
ष्ठीलोदरं कुण्डली ।

बस्तिश्शुक्रमतीतमुष्णमरुदुत्सङ्गं
क्षयं पित्ततः
सर्वैर्ग्रन्थिशकृद्विघातसदना-
ख्या विंशतिर्मूत्रजाः ॥ ३६ ॥

मेहाः स्युर्बहुमूत्रता दश कफा-
त्तोयेक्षुसान्द्रासवाः
पिष्टश्शुक्रसिताख्यशीतशनकै-
र्लालाश्च साह्वयाः क्रमात् ।
पित्तात् क्षारकनीलकाळरजनी-
माञ्जिष्ठरक्ताह्वया
याप्या मज्जवसेभमाक्षिकसमा-
स्त्याज्याश्च वातात्मकाः ॥ ३७ ॥

शोफस्वरूपाः पिटकाः प्रमेहे
शराविकाद्याः कफपित्तरक्तैः ।
नामानुरूपाश्च शरावकूर्म-
पृष्ठोपमा जालवतीसिराभिः ॥ ३८ ॥

पृष्ठोदरे वा विनतालजी तु
त्वचं दहत्युत्थितमात्र एव ।
मसूरिका सर्षपिका च ताभ्यां
तुल्या समाभिः पिटकाभिराख्याः ॥ ३९ ॥

पुलिण्यतीव महती कठिना विदारी
वृत्ता स्वकन्दसदृशा बहिरङ्गगास्ताः ।
बाह्यश्च विद्रधिरथान्तर आन्तरे तु
हृन्नाभिबस्तियकृदुण्डुकवङ्क्षणादौ ॥ ४० ॥

स्त्रीणान्तु विद्रधिरथास्रज आन्त्रजश्च
दुष्टार्तवात् स्तनगतः स्तनविद्रधिश्च ।
रुङ्मूलदार्ढ्यमिह विद्रधिलिङ्गमन्तः
पक्वे तु पूयसहितात्मसमीपमार्गः ॥ ४१ ॥

वृद्धिर्मुष्कगतान्त्रतो जठरगो
गुल्मस्स्वमार्गाहतो
वायुः शूलकरश्च रत्युदरगं
शूलश्च शूलाह्वयम् ।
आनाहः पवनस्य वृद्धिरुदरे
साटोपशूलान्वितोऽ
ष्ठीला तत्सदृशी तु निस्वनयुता
नाभेरधो मारुतः ॥ ४२ ॥

क्षुन्नाशो जठराभिवृद्धिरुदरं
पार्श्वाशयप्रच्युतिः
प्लीहान्तर्जलवर्धना दृहितश-
ल्याहारभिन्नान्त्रतः ।
मार्गस्यावरणान्त्रलेप्यशनदु-
र्नामादिभिर्वा क्रमात्
कृच्छ्रं पक्षमतीत्य हन्ति जठर-
द्वन्द्वं यदत्योदितम् ॥ ४३ ॥

पाण्डुः पाण्डुशरीरतात्र रुधिरे
क्षीणे बले मारुते
पित्ते श्लेष्मणि चाग्निदेहसदनं
वृद्धे पुनः कामिला ।

पीतश्यावहरिन्मयी गुरुमती
शोफस्वरूपा च सा
कुम्भाख्याप्यतिशोफदाहसहिता
ते कृच्छ्ररोगाः क्रमात् ॥ ४४ ॥

शोफः स्थूलशरीरता कृशतनो-
स्त्वायाति पानादिभि-
र्दुष्टं पित्तकफासृगादि पवनो
नीत्वा सिराभिर्बहिः ।
रुद्धस्तिष्ठति यत्र तत्र कुरुते
शोफन्तु वस्तावधो
मध्ये मध्यगमूर्ध्वभागगमथो
दोषे स्थिते वक्षसि ॥ ४५ ॥

वीसर्पः पिटकाभिराचिततनु-
र्बाह्यान्तरद्वन्द्वगो
विद्श्लेष्मास्रबहिर्मलोत्थितभिदा-
वन्तः क्रिमीजन्तवः ।
रक्तस्य स्रवतो गतिश्च सिरया
शोफश्च रागोष्णता
कण्डूगौरवदाहपाकसहितं
नाम्ना स्मृतं शोणितम् ॥ ४६ ॥

वैवर्ण्यं त्वचि सुप्तता परुषता
कुष्ठं दशाष्टौ क्रमात्
कापालाख्यमुदुम्बरस्य रसनं
भद्राह्वयं मण्डलम् ।

ज्ञेयं काकनपुण्डरीककटिपं
सिध्मालसं बह्वरुः
पामा स्फोटविचर्चिकैकदलच-
र्माख्यं विपादीति च ॥ ४७ ॥

बाह्याभ्यन्तरपक्षसन्धिकमिल-
त्साक्षेपदण्डोरुह-
स्तम्भायामसिराग्रहाभिधहनु-
स्रंसापबाह्वादयः ।
विश्वभ्याङ्घ्रिगहर्षकण्टकसदा-
हा जानुखञ्जामयो
वातोऽशीतिविधस्तदर्धविहितं
पित्त ततोऽर्धं कफः ॥ ४८ ॥

वातव्याधिरिह द्विधावरणतो
लब्धावकाशाच्च तौ
रुक्तोदादिभिरन्वितौ निगदितौ
स्थूले कृशे प्रायशः ।
श्वित्रन्त्वञ्जनता त्वचीदमरुणं
दोषैः किलातन्वते
रोगाः केचन रक्तजाः पुनरसा-
द्धयांस्तान् ब्रवीमि क्रमात् ॥ ४९ ॥

गम्भीरो बलवानतीतसमयः
श्वासप्रलापभ्रमै
रक्ताक्षं कृशशूनशूलहृदयं
क्षीणं निहन्ति ज्वरः ।

रक्तं बृद्धमशेषमार्गगमनं
हृत्कण्ठवक्त्रे सज-
च्छोफच्छर्द्यतिसारजूर्तिसदन-
श्वासं विवर्णं तथा ॥ ५० ॥

यक्ष्मा पार्श्वरुजानाहरक्तच्छर्द्यंसतापिनम् ।
हन्ति मन्दानलं तृष्णाबहिर्जिह्वं विचेतनम् ॥ ५१ ॥

छर्दिर्वेगवती मूत्रविड्रक्तश्वासंसंयुता ।
मदात्ययोऽतिशीतार्तं क्षीणं तैलनिभाननम् ॥ ५२ ॥

अर्शांसि पाणिपन्नाभिगुदमुष्कास्यशोफिनम् ।
हृत्पार्श्वाङ्गरुजाच्छर्दिपायुपाकज्वरातुरम् ॥ ५३ ॥

नानावर्णयुतोनविड्बहुशकृ-
त्पूत्यच्छरक्तं सित-
स्तैलक्षौद्रवसापयोदधिघृतै-
स्तुल्योऽतिसारो नरम् ।
राजीतन्तुयुतो निहन्ति कसन-
श्वासप्रवाहज्वरैः
क्षीणं भ्रष्टगुदं हतानलमसृ-
ङ्मांसादिभिः प्रस्रवः ॥ ५४ ॥

अश्मरी शूनवृषणं बद्धमूत्रं रुजार्दितम् ।
मेहस्तृड्दाहपिटकामांसशोफातिसारिणम् ॥ ५५ ॥

पिटकाश्चर्महृत्पृष्ठस्तनांसगुदमूर्ध्वगाः ।
सन्धिपादकरस्थाश्च ज्वरतृड्दाहसंयुताः ॥ ५६ ॥

गुल्मः कूर्म इवोन्नतो बहुसिरा-
नद्धो ज्वरश्वासशो-
फातीसाररुजान्वितो जठरवृ-
द्धिच्छर्दिहिध्मान्वितः ।
विण्मूत्रग्रहशोफजूर्त्यतिशक्ल-
न्मूर्छावमिश्वासहि-
ध्माढ्यं हन्त्युदरं विरेचनहृतं
वृद्धं द्रवत्वक्तनु ॥ ५७ ॥

पाण्डुर्निहन्ति बलवान् शूनं पीतनखेक्षणम् ।
तन्द्रादाहारुचिच्छर्दिमूर्छाध्मानातिसारवान् ॥ ५८ ॥

पादादिः पुरुषं निहन्ति मुखतो
नारीं द्वयं जाठरः
शोफः श्वावमीज्वरातिसरण-
श्वासैर्बहूपद्रवैः ।
राजीमानतिसारजूर्त्यवसितौ
जातस्तयोर्जन्म वा
शोफान्ते वपुषो विनास्यकरपा-
दस्थश्च शोफस्तथा ॥ ५९ ॥

ज्वरास्यशोपाङ्गविमर्दसन्धि-
विश्लेषणारोचकरोमहर्षैः ।
युक्ता निहन्त्याशु मसूरिकान्त-
र्मुखा च बाह्ये किणसन्निभासन् ॥ ६० ॥

विसर्पकासवैवर्ण्यज्वरमूर्छाङ्गभङ्गवान् ।
कुष्ठं विशीर्यमाणाङ्गं रक्तनेत्रं हतस्वरम् ॥ ६१ ॥

वायुः सुप्तत्वचं भुग्नं कम्पशोफारुजातुरम् ।
वाताश्र ज्वरमूर्छायमदास्वप्नज्वरान्वितम् ॥ ६२ ॥

शिरोरोगारुचिश्वासमोहविड्भेदतृड्भ्रमैः ।
घ्नन्ति सर्वामयाः क्षीणस्वरधातुबलानलम् ॥ ६३ ॥

तृट्छूलार्तं त्यजेत् क्षीणं विड्वमं वेगरोधिनम् ।
दृष्टरिष्टं विशेणषे शेषान् शीघ्रमुपाचरेत् ॥ ६४ ॥

इति पुरुषोत्तमविरचितायां भेषजपद्धत्यां
रोगविचारखण्डः ॥

भेषजविकल्पखण्डः

अथ प्रवक्ष्यामि महीजलाग्निवा-
व्यनन्तसंयोगविशेषभेषजम् ।
शरीरधातुक्षयवृद्धिजामय-
ज्वरादिरोगप्रशमैकसाधनम् ॥ १ ॥

तद्द्रव्यमद्रव्यमिति द्विधा स्याद्-
द्रव्याणि च स्थावरजङ्गमानि ।
मुस्ताज्यमुख्यानि शरीरचेतो-
व्यापाररूपाण्यपराणि तानि ॥ २ ॥

विपक्षभूतोत्थितदोषजामयान्
गुणैर्हरन्ति स्वरसैर्विपाकजैः ।
सवीर्यभावैरिह विंशतिर्गुणा
विपक्षपक्षक्षयवृद्धिकारिणः ॥ ३ ॥

गुरुलघुशिशिरोष्णस्निग्धरूक्षत्वसान्द्र-
द्रवमृदुकठिनाख्याश्श्लक्ष्णपारुष्ययुक्ताः ।
स्थिरसरविशदा ये पिच्छिलस्थूलसूक्ष्मा
निगदितसविपक्षा मन्दतीक्ष्णौ गुणास्ते ॥ ४ ॥

रसो रसज्ञानुभवः क्वबग्नि-
क्ष्माग्न्यब्ख्वाय्वग्निमरुत्क्षितीशैः ।
द्वयोर्द्वयोर्मधुरस्ततोऽम्लः
पटुश्च तिक्तः कटुकः कषायः ॥ ५ ॥

रसे सुपक्वे जठराग्निना यो
रसान्तरस्स त्रिविधो विपाकः ।
स्वादोः पटोस्स्वादुरथाम्लजोऽम्लः
प्रायः परेषां कटुको विपाकः ॥ ६ ॥

आद्यास्त्रयो घ्नन्ति रसास्समीरं
शेषाः कफं स्वादुकषायतिक्ताः ।
पित्तं प्रकुर्वन्ति परे विपाकाः
नामानुरूपाणि च यानि तानि ॥ ७ ॥

नानात्मकद्रव्यगुणेषु वह्नेः
सोमस्य चोत्कर्षत उष्णशीते ।
वीर्ये प्रभावरसदृशे रसादौ
विशिष्टता बुद्धिकरी यथोग्रा ॥ ८ ॥

स्पर्शे गुणाः स्वोक्तफलानि दद्यु-
र्भुक्ते रसः पाकरसोऽग्निपक्वे ।
कालान्तरे वीर्यमपि स्वशक्त्या
सदा सुसूक्ष्मात्मतया प्रभावः ॥ ९ ॥

एते फलप्राप्तिषु चानुमेयाः
पाकादयस्तेषु फलासमेषु ।
गुणान् रसो हन्ति रसान् विपाकः
पाकांश्च वीर्यं सकलं प्रभावः ॥ १० ॥

एवं रसाद्याश्रयभेषजानि
परीक्षितानि स्वगुणादिभिश्च ।
वक्ष्ये पृथग्योगफलानि चैषां
योगो गुणोत्कर्षविशेषहेतुः ॥ ११ ॥

तोयक्षीरघृतादयो द्रवगणा-
श्चान्नादयश्चाद्रवाः
पेयाद्या उभयात्मकाश्च फलदा-
स्ते योगसंस्कारतः ।
अद्रव्याणि च भेषजानि दिवस-
र्त्वात्मोपचर्याणि च
प्रायश्चित्तविशेषमन्त्रजपहो-
माद्याश्च सर्वाः क्रियाः ॥ १२ ॥

अव्यक्तं रसतो हिमं लघु जलं
सन्तर्पणं जीवनं
वाय्वर्कादिभिराहतश्च विमलं
दोषत्रयघ्नं शृतम् ।
इक्षूदङ्गुरु मूत्रले लघु च कै-
रोदश्च रम्भाजलं
सोमव्याधिहरं प्रमेहहरम-
प्यौदुम्बरं शीतलम् ॥ १३ ॥

स्निग्धं स्वादु हिमं पयो गुरु गवां
मेध्यश्च सन्धानकृ-
न्नारीणां महिषीपयोऽतिगुरुल-
घ्वाजं क्षयार्शोस्रजित् ।
चक्षुष्यं लघु दीपनं रुचिकरं
सर्पिस्तथाम्लं दधि
ज्ञेयं तक्रमथोष्णरूक्षकटुल-
स्वल्पानलादौ हितम् ॥ १४ ॥

मूत्रं रूक्षकटूष्णतीक्ष्णलघुधा-
न्याम्लश्च मद्यानि वा
तैलं वातकफापहं गुरु वसा
नैम्बं तथा तौवरम् ।
ऐरण्डं कटिवातजिद्दशनशू-
लघ्नश्च केरोद्भवं
सर्वं वातकफापहं श्रवणशू-
लघ्नश्च राजीभवम् ॥ १५ ॥

शाल्यन्नं विहितं नृणां समरसं
भोज्यं रसैः स्वोचितैः
पेयाद्या लघु दीपनाश्च गुरवः
क्षीरादिभिः साधिताः ।
गोधूमः स्थिरताकरः सुमधुरः
कङ्गुश्च सन्धानकृ-
द्रूक्षो वेणुभवो यवास्तु गुरवो
नूत्नाश्च पक्वाश्चिरात् ॥ १६ ॥

व्यञ्जनानि यथाद्रव्यसंस्कारगुणभेदतः ।
मृदूनि भर्जितान्यत्र लघून्यन्यानि चान्यथा ॥ १७ ॥

विविधानि च विज्ञेयान्यौषधानि रसादिभिः ।
घ्नन्ति दोषानतस्तेषां रसमात्रमिहोच्यते ॥ १८ ॥

अत्र दोषहरत्वेन भेषजानां रसाः स्मृताः ।
रसनानुभवत्वञ्च परीक्षेत यथायथम् ॥ १९ ॥

सर्पिः क्षीरसिताबलामधुकवी-
राभीरुशुक्लातुका
पर्णिन्यक्षसहाब्जगोक्षुरतिला-
द्राक्षाश्वगन्धादयः ।

जीवन्तीकतकं परूषकतृणं
कूश्मोर्वारुतुम्बान्विता
दूर्वागोरसनादयश्च मधुरा
भूतालगुप्तादयः ॥ २० ॥

धात्रीडाडिमभव्यवेतसकपि-
त्थाम्लाम्लिकागन्धवृ-
क्षाम्लं ताम्रसुराऽऽरतालदधित-
क्राद्यास्तथाम्ला रसाः ।
क्षारस्सैन्धवटङ्कणाब्धिजयव-
क्षारास्ससौवर्चलः
पाषाणद्रुतशैलशुक्तिजमनो-
ह्वाद्यास्तृतीया रसाः ॥ २१ ॥

बस्तापर्पटभूमिनिम्बकटुका-
पाठामृताशारिबा-
वाशानिम्बपटोलविल्वहिमसे-
व्याम्भोवचावत्सकाः ।
रुग्दुस्पृग्रजनीविशालविषदू-
र्वाकिरातादय-
स्तिक्ता गुल्गुलुदारुकट्फलकुमा-
रीतस्कराः पाटलाः ॥ २२ ॥

शुण्ठीधान्यकणाग्निवेल्लतुलसी-
चव्याजमोजोषणा
वैकुण्ठद्विकरञ्जशिग्रुलशुन-
स्नुक्सूर्यभल्लातकाः ।
भार्ङ्गीकुम्भनिकुम्भसूरणयवा-
नीहिङ्गुयज्ञद्रुमा
वज्री पप्फणनागजातिबकुलं
जङ्गा शमी चोषणाः ॥ २३ ॥

क्षीरद्रुमोदकरवाखदिरासनेषु
जम्ब्वर्जुनद्विशबरीजतुसर्जफेनाः
केरद्विपुष्पजचवीततगैरिकाद्याः
पथ्याद्वयेन्द्रसुषवीप्रमुखाः कषायाः ॥ २४ ॥

वातश्लेष्महराः पुनर्नवकर-
ञ्जार्काग्निपथ्यावचा-
चित्रानागरदारुशिग्रुलशुना-
ध्विश्वाकुतुम्बादयः ।
नन्द्यावर्तकपञ्चमूलहपुषा-
दुर्धूरकार्पासका
ऐन्द्रीतद्दयिते शताह्वयषडी-
मञ्जौषधाद्या अपि ॥ २५ ॥

कृष्णाधान्यपटोलडाडिमवरा-
दुस्पर्शजातीसिता-
भूनिम्बं लघु पञ्चमूलमुसली-
कूश्माण्डतुम्बीलता ।
चाशासैन्धवजीरकाजघृतदु-
ग्धक्षीरिवृक्षाङ्कुराः
शस्तास्ते खलु सर्वदोषशमना-
स्सर्वत्र योज्यास्ततः ॥ २६ ॥

अत्रानुक्तानि भेषज्यान्यन्यत्रोक्तानि कानिचित् ।
रसवीर्यादयस्तेषां ज्ञेयास्तद्दोषनाशतः ॥ २७ ॥

द्रव्यैरेतैर्दोषदूष्यादियोग्यै-
रन्तर्बाह्याहारशक्यादयो ये ।
कार्या नित्या ये च नैमित्तिकास्ते
पानीयाभ्यङ्गादयस्तान् ब्रवीमि ॥ २८ ॥

पानीयं सुशृतार्धशेषमुदक-
प्रस्थस्य कर्षौषधैः
पेया तण्डुलसाधिता च शृतम-
ष्टांशं पलद्रव्यतः ।
पादांशश्च घृतादिपाकसमये
योज्यं व्रणादौ यथा
दोषं निस्सलिलं पयः शृतमथो
तक्रं सकल्कं खळः ॥ २९ ॥

तुल्यद्वित्रिचतुर्गुणोदकपयो-
भिः श्लक्ष्णकल्कैः पचेत्
प्रस्थं द्वित्रिचतुष्पलैस्स्वविहित-
स्नेहस्य न श्लक्ष्णता ।
आज्यस्यात्र तिलोद्भवादिबहुवै-
कम्पास्वदोषोचितं
वायौ श्लेष्मणि चोष्णमेव सकलं
पित्ते प्रयोज्यं हिमम् ॥ ३० ॥

पृथक्फलानि चोद्दिष्टान्यत्र योगफलान्यथ ।
तत्तत्कर्मसु विज्ञेयान्यद्रव्याणि ब्रवीमि च ॥ ३१ ॥

उत्थायोषसि शुद्ध आत्मविहितं
स्मृत्वाथ कृत्वा हरिं
नत्वा स्नानमथाशनञ्च शयनादीनि
स्वकाले भजेत् ।
लघ्वन्नं यदि पूरयेदुदरम-
ध्यं तेन पादं जलैः
पादांशञ्चावशेषयेद्यदि च गु-
र्वन्नं ततोऽल्पं भजेत् ॥ ३२ ॥

वर्षाशरद्वसन्तेषु वातपित्तकफच्छिदः ।
क्रियाः कार्या विशेषेण वीक्ष्य दोषफलं सदा ॥ ३३ ॥

वेगान्न धारयेद्वातविण्मूत्रक्षवतृट्क्षुधाम् ।
निद्राकासश्रमश्वासजृम्भाश्रुच्छर्दिरेतसाम् ॥ ३४ ॥

शौचे पाने क्वथितसलिलं भोजने पत्थ्यमन्नं
मात्रायुक्तं निशि शयनमन्वात्मसंस्काररक्षाम् ।
नित्यं कुर्याद्विधिनियमितान्यात्मशक्त्यार्चनादि
क्षुद्रानद्यादथ परिहरेदातपायासमुख्यान् ॥ ३५ ॥

पञ्चभूतसमवेतधातुवृ-
द्धिक्षयोत्थितरुजां प्रति क्रीयाः ।
पञ्चभूतसमवेतभेषजै-
स्तद्विपर्ययसमानतो गुणैः ॥ ३६ ॥

अज्ञातान्यपि भेषज्यान्यनुक्तानि च कानिचित् ।
विज्ञेयानि च यान्यत्र विद्वान् ज्ञात्वा समादिशेत् ॥ ३७ ॥

मन्दाग्नेर्बहुगुर्वसात्म्यविषमा-
हाराद्यजीर्णात्मके
भुक्ते तोदविदाहगौरवयुते
तल्पे शयीतात्मवान् ।
तक्रं वा सुभृतं सुखोष्णमुदकं
वा सैन्धवाढ्यं पिबेत्
किञ्चिज्जीर्यति निःसृते यदि गते
वेगे पिबेद्भेषजम् ॥ ३८ ॥

विषूच्यामतिसारोक्ता वमनोक्ताश्च याः क्रीयाः ।
पाष्ण्योर्दाहोऽतिवृद्धायां दुर्बले तु पयः पिबेत् ॥ ३९ ॥

इति पुरुषोत्तमविरचितायां भेषजपद्धत्यां
भेषजविकल्पखण्डः

क्रियाभेदखण्डः

अथ प्रवक्ष्यामि समस्तमारुता-
द्युपक्रमं बृंहणलङ्घनात्मकम् ।
ज्वरादिरोगेषु पृथक् चिकित्सितं
परीक्ष्य दूतादिभिरादिशेत् फलम् ॥ १ ॥

दूतस्यागमनस्वभाववचन-
स्थानैश्शनैरात्मनो
वृत्त्या प्रश्नगृहग्रहैस्तदपरै-
र्ज्ञात्वा चिकित्साफलम् ।
दृष्ट्वा रोगिणमस्य नेत्रनखवि-
ण्मूत्रत्वगिच्छादिभि-
र्दोषानायुररिष्टतो ज्वरमुखान्
रोगांश्च तल्लक्षणैः ॥ २ ॥

रुच्याहारसुयोगपाकमलमू-
त्रोत्सर्गधातूदयो-
त्साहप्रीतिमुखैः क्रियाः सुकरतां
सात्म्यं सुखस्योदयात् ।
दृष्ट्वा दृष्टनिमित्ततस्स्वपरसा-
ध्यासाध्यरोगान् भिषक्
ज्ञात्वोपक्रममारभेत मलधा-
तुव्याधिभेदात्मकम् ॥ ३ ॥

वायौ वृद्ध उपक्रमो मधुरप-
ट्वम्लैर्गुरूष्णद्रव-
स्निग्धैर्लेपनपानभोजननिवा-
ताभ्यङ्गसेकादिभिः ॥

स्नेहस्वेदनवस्तिभिश्च बहुभिः
स्नेहैर्विरेकादिभिः
सामे दीपनपाचनैश्च विषमे
कार्यश्च तिक्तादिभिः ॥ ४ ॥

पित्ते शीतकषायतिक्तमधुरै-
र्लेपादिभी रेचनैः
कान्तापुत्रसुहृत्सरोजसलिल-
च्छायेन्दुमन्दानिलैः ।
सत्काव्यादिमनोनुकूलविषयै
रक्ते तु पित्तोदितै-
र्वायौ श्लेष्मणि चानुगे तु मधुरै-
स्तिक्तैः कषायैरपि ॥ ५ ॥

श्लेष्मण्युष्णकषायतिक्तकटुरू-
क्षालेपनाद्यैश्शिरो-
रेकच्छर्दिविरेचनप्रभृतिभि-
र्गण्डूषधूमाञ्जनैः ।
चिन्ताजागरणव्यवायमधुभि-
स्तीक्ष्णैश्च मद्यादिभि-
र्मिश्रे मिश्र उपक्रमश्च बलिनः
प्राक् सन्निपाते तथा ॥ ६ ॥

वृद्धे धातौ लङ्घनं रक्तमोक्षो
रक्ते मांसे क्षारशस्त्राग्नियोगः ।
विड्वृद्ध्युत्थे रेचनं क्षीरसर्पि-
स्तिक्तैरस्थ्नः स्यात् क्षये बृंहणञ्च ॥ ७ ॥

उपक्रमस्तु द्विविधो यदत्र
धात्विन्द्रियौजोबलकृत् क्षमाजम् ।
तद्बृंहणं देहबृहत्त्वकृद्य-
च्चलङ्घनं खानिलवह्निजश्च ॥ ८ ॥

तत्र द्विधा बृंहणमात्मरक्षा-
विवृद्धिभेदेन यथासृगादौ ।
संस्थापनं निस्स्रुतशोणितादे-
र्विवर्धनं यक्ष्मणि चामिषादेः ॥ ९ ॥

पित्तरक्तपिटकातिसारतृट्-
छर्दिमेहविषमद्यरोगिणाम् ।
दाहरागसदनाग्निशल्यपा-
तामयेष्वपि च येषु तेषु च ॥ १० ॥

वातपित्तविकृतं कृशं क्षत-
क्षीणदुर्बलमचेतनं नरम् ।
वर्धनेन परिबृंहयेत्तथा
व्याधिभेषजसुराध्वकर्शितम् ॥ ११ ॥

रक्षणं शिशिरलेपसेकमा-
ह्यान्नपानशयनासनादिभिः ।
वर्धनञ्च मधुरान्नपानतः
स्नानहर्षसुखसुप्तिविश्रमैः ॥ १२ ॥

कारस्करोदकसपयोद्रुदूर्वा-
गोजिह्विकामृतवरातिलकेरपूगैः ।
गोपात्मजामधुकचन्दनसेव्यतोयै-
र्लेपादिभिश्च सघृतैः परिरक्षणं हि ॥ १३ ॥

क्षीरेण मूर्ध्नि परिषेचनमाज्यतैला-
भ्यङ्गः सुखोष्णमशनं सघृतं मितञ्च ।
क्षीराशनं निशि सुषुप्त्यमलात्मता च
देहस्य वर्धनकराणि सुखोपभोगः ॥ १४ ॥

दोषाणामथ शोधनञ्च शमन-
ञ्चेति द्विधा लङ्घनं
शुद्धिर्वस्तिविरेकनस्यवमना-
सृङ्मोक्षणाद्यैर्भवेत् ।
शान्तिर्दीपनपाचनातपमरु-
द्व्यायामसेवोपवा-
साद्यैस्स्यात् प्रचले मले बलवतः
शुद्धिर्हिता नान्यथा ॥ १५ ॥

वस्तिर्वातजशूलगुल्मनहनो-
दावर्तकादौ हितो
रेकः पैत्तिकशोफकुष्ठजठरा-
दौ छर्दनं श्लेष्मजित् ।
हृल्लासारुचिगौरवादिषु कफे
नस्यं शिरोगेऽस्रजे
कुष्ठादौ रुधिरस्रुतिश्च सलिलै-
श्शेषेषु संशोधनम् ॥ १६ ॥

वस्तिर्धारणमौषधस्य मरुत-
स्तच्छोधनं रेचन-
ञ्चाधोनिस्सरणं विशोऽथ वमनं
वक्त्रेण च श्लेष्मणः ।
पीत्वा नासिकया कफस्य हरणं
नस्यं जटालाबुशृ-
ङ्गाब्दाद्यैरसृजो व्रणादिषु बहि-
स्सम्मार्जनं क्षालनम् ॥ १७ ॥

छन्नेऽग्नावुपवास एव विबले
पेयादयो दीपनाः
सामे स्युश्शमनाश्च पाचनकषा-
याद्यास्त्वचि श्लेष्मणि।
सूर्याद्या अधिके तु तिक्तकघृता-
द्याश्शोषणास्सन्धिगे
व्यायामो मुखवायुरल्पकफशो-
फेऽभ्यङ्गसेकादयः ॥ १८ ॥

स्नेहं स्तम्भनं नान्यद्बृंहणं वृद्धिकृत्ततः।
स्वेदनं रूक्षणञ्चापि लङ्घनं लघुताकरम् ॥ १९ ॥

वातश्चदशमूलाम्बुवस्तयो वातशोधनाः।
सपित्ते क्षीरसंयुक्तास्सकफे योगतैलतः ॥ २० ॥

चित्रातैलपयो रेके वायौ शस्ता सिता त्रिवृत्।
पित्ते कफे तु दन्तीस्नुक् शम्याशेफालिकादयः ॥ २१ ॥

धन्वन्तरिश्छर्दिकृदुग्रदुग्धं
नस्ये च तिक्तासरसं सविश्वम्।
गण्डूषणे स्नेहपयस्त्रिदोषे
व्योषं ग्रहोत्थं मधुना यथास्वम् ॥ २२ ॥

धूमपानं कफहारं घृतनागरजं मृदु।
पथ्यामनोह्वातैलोत्थं तीक्ष्णं स्यात् कृष्णया कृतम् ॥ २३ ॥

अभ्यङ्गार्थमिहानिलात्मनि गदे
स्नेहं बलादाशमू-
लाम्भोभिः पयसा वरीशबरदू-
र्वागोरसज्ञारसैः।

पित्ते श्लेष्मणि विल्वभृङ्गवृषवि-
श्वाब्दासनाद्यैः पयो-
ऽद्यैर्वासृजि लाक्षयामृतवरा-
म्भोभिः सकल्कैः पचेत् ॥ २४ ॥

रुग्यष्टीजलसेव्यचन्दनवरा-
चोराश्वगन्धाञ्जनै-
र्मञ्जिष्ठामसिमेघदारुनतजा-
तीभिश्चतुर्जातकैः ।
स्पृक्कासर्जतुरुष्कगुल्गुलुरस-
श्रीवासचण्डातप-
स्थौणेयागरुकुम्भमद्रिरजनी-
पुन्नागशुक्त्यादिभिः ॥ २५ ॥

लेपस्त्वग्गतमारुते तिलबलै-
रण्डाश्च गन्धादिभिः
पित्ते स्तम्भनभेषजैरसृजि य-
ष्टीसर्जलाक्षादिभिः ।
शुण्ठीशिग्रुकरञ्जदारुरजनीपथ्या-
वचाद्यैः कफे
तक्रेणापि च केरजेन पयसा
सेकश्च तैरेव हि ॥ २६ ॥

पानाभ्यङ्गैः स्नेहनं स्नेहतो यत्
स्वेदस्तापोष्मोपनाहद्रवैश्च ।
स्नेहाभावो रूक्षणं स्तम्भनं प्रा-
गुद्दिष्टं यद्रक्तपित्तामयादौ ॥ २७ ॥

वातघ्नपत्राणि च केरमज्जा-
शाल्योदनं स्वेदनभेषजानि ।
तापे च नाहो च पयः पयोद्रु-
पूर्वैर्घृताद्यैश्च तथारनालैः ॥ २८ ॥

दीपनादीनि विज्ञेयान्यौषधानि यथायथम् ।
अभ्यङ्गादिषु चोक्तानि शमनानि ज्वरादिषु ॥ २९ ॥

न बृह्मयेल्लङ्घनीयान् बृम्ह्यांस्तु मृदु लङ्घयेत् ।
द्विविधेष्वपि रोगेषु सत्सु चायमुपक्रमः ॥ ३० ॥

इति सामान्यतः प्रोक्ता दोषधातुमलक्रियाः ।
ज्वरादिषु पृथग्वक्ष्ये दोषाधिष्ठानभेदतः ॥ ३१ ॥

इति पुरुषोत्तमविरचितायां भेषजपद्धत्यां
क्रियाभेदखण्डः

आगग्नेः परिरक्षणार्थमुपवा-
सो दीपनार्थं ज्वरे
पेया दोषशमाय भेषजगणाः
कार्याः कषायादयः ।
आमाद्याश्रयशोधनाय पचना-
दीनि प्रयोज्यानि वा-
थाभ्यङ्गादि च पोषणाय वपुषः
सर्पिः स्थिरत्वाय च ॥ १ ॥

यावत्स्याल्लघुतात्मनो विमलता-
क्षाणाश्च पानाशने
काङ्क्षा तावदिहोपवाससमय-
स्तत्राल्पमल्पं पिबेत् ।
पानीयं परमग्निदीपनकरीं
पेयां ज्वरे चेन्मृदौ
दीप्तेऽग्नौ सति पाचनौषधकषा-
यः स्याद्बद्धात्मके ॥ २ ॥

पक्वे दोषभवे ज्वरे सति पिबेत्
स्वं स्वं कषायं खलु
पथ्यान्नानि च शीलयेद्वमनरे-
कासृक्शिरोरेचनम् ।
बस्तिश्च ज्वरमार्गशोधनमपी-
हाभ्यङ्गसेकादयो
व्याधिक्षीणशरीरपोषणकरा-
ण्याज्यानि योज्यानि च ॥ ३ ॥

मुस्तापर्पटविश्वभेषजकृतं
पानीयमिष्टं ज्वरे
पेया नागरधान्यजा च पवने
दुस्पृश्वलाविल्वतः ।
पित्ते द्व्यंशुमती सहाद्विबृहती-
भिः पञ्चकोलैः कफे
युक्त्या सैन्धवशर्करामधुयुता
द्वन्द्वे समस्तैर्निजैः ॥ ४ ॥

पाठाधान्यकुनिम्बविश्वजलद-
ह्रीबेरजः पाचनः
क्वाथश्छिन्नरुहौषधाम्बुदयवा-
षैर्वातजे पित्तजे ।
सेव्याम्बुदविश्वपर्पटहिमैः
पथ्या वचा षट्फल-
क्ष्मानिम्बौषधदारुधान्यघनभा-
र्ङ्गीपर्पटैः श्लेष्मजे ॥ ५ ॥

द्राक्षाम्ब्वब्दपरूपलोध्रहिमय-
ष्टीसेव्यधात्रीमृणा-
लोद्यत्केसरशारिबोत्पलमधू-
कैर्वातपित्तज्वरे ।
वातश्लेष्मणि पर्पटौषधवचा-
पाठामृतारग्वधैः
पित्तश्लेष्मणि चामृतावृषवरो-
शीराब्दतिक्तोत्तमैः ॥ ६ ॥

छिन्नोद्भवावृषकिरातकपर्पटानां
शुण्ठ्या वलाहकयवासकयोः क्रमेण ।
एकद्वयत्रितयभागकृतः कषायः
सम्मूर्छितज्वरमपोहति सान्निपातम् ॥ ७ ॥

नागरामृतहरीतकीः क्रमा-
न्नागहस्तनयनाङ्घ्रिभागशः ।
साधुसिद्धमुदकं सशर्करं
नाशयत्यखिलदोषजं ज्वरम् ॥ ८ ॥

क्षीरपक्वमरिचन्दनप्लुतं
तालपल्लवरसश्च शीतजित् ।
दाहजिच्चलदलाङ्कुरोदकं
सर्पिषापि च सहाशृतं पयः ॥ ९ ॥

उक्तमेव वमनादिभेषजं
स्नानतोयममृतासहावृषैः ।
कान्तिसप्तचलपल्लसिद्धम-
भ्यङ्गतैलमपि चोत्तमाङ्गके ॥ १० ॥

लाक्षामृतारसे सिद्धं तैलमभ्यञ्जने हितम् ।
दधिमण्डयुतं शीर्ष्णि त्रिफलाद्यैः प्रसाधितम् ॥ ११ ॥

दाहे तु सर्पिषाभ्यङ्गः शीतसेकः प्रशस्यते ।
सर्पिर्वरावृषशृतं कल्याणं दशमूलजम् ॥ १२ ॥

दोषेषु सन्निपतिते विवशे शरीरे
नष्टस्मृतौ नखमुखादिषु तैललेपः ।
शस्तश्च पानमपि बोधनमिन्द्रियाणां
नस्यं सुपक्वमिह केरजनिम्बजश्च ॥ १३ ॥

इन्द्राणीवृषसर्पगन्धतुलसी-
निर्गुण्डिकानां रसे
तैलं सैन्धवजीरकत्रयवचा-
रुग्व्योषसेव्याम्बुदैः ।

सिद्धं स्तन्ययुतं सुपक्वममलं
कर्पूरयुक्तं पिबे-
न्नासासन्धिनखादिषु स्पृशतु त-
द्बोधप्रदं स्यान्नृणाम् ॥ १४ ॥

तोये शतगुणे पक्वतैलाभ्यङ्गश्चतुर्थके ।
ज्वरे पथ्यारजः सेव्यं पुराणे स्वेदजानि च ॥ १५ ॥

आगन्तावभिघातजे क्षतविधिः
कार्योऽभिषङ्गे मन-
स्संशुद्धिर्विषयाप्तिरन्यविषयो-
द्भूते विषे तत्क्रियाः ।
शापाथर्वणमन्त्रजे तु गुरुदे-
वाद्यर्चनात्मार्पणं
रौद्रीमन्त्रहुतिर्जपश्च यजनं
सर्वत्र धान्वन्तरम् ॥ १६ ॥

रक्ते रोचनमूर्ध्वगे तु वमन-
श्चाधोगते श्लैष्मिके
कार्यास्तिक्तकषायकैस्सुमधुरै-
र्वायौ कषायादयः ।
पेयादीनि च पित्तजूर्तिविहिता-
न्यभ्यङ्गसेकादयः
शीतास्तैरपुनर्भवाय घृतपा-
नादीनि कार्याणि च ॥ १७ ॥

वाशाषडङ्गैर्वृषजश्च शुद्धो
बलाजले पर्युषितैः कषायः ।
द्राक्षादिभिर्वा नसि सम्प्रवृत्ते
मूर्धि न्यसेन्नूतनगोशकृच्च ॥ १८ ॥

असृग्धरेऽप्येवमिहातिमात्र-
प्रवृत्तरक्तप्रशमाय पेयम् ।
जपापयः केरजपुष्पसारं
सितामधुभ्यामिति मे गुरूक्तिः ॥ १९ ॥

अस्थिस्रावे सोमरोगेऽपि चैवं
सर्पिस्सेव्यं जीवनीयैः पयो वा ।
वाराह्या वा मत्स्यनेत्राम्बुना वा
सोमव्याधौ सर्पिषाभ्यङ्ग इष्टः ॥ २० ॥

कासे कण्ठविशोधनाय कफवा-
तोत्थे तु धूमं पिबे-
त्तीक्ष्णं श्लेष्मणि शोधनञ्च शिरसः
पित्ते पयस्सेचनम् ।
सर्वस्मिन्ननुलोमनाय मरुतः क्वाथं
बलाद्यैः पिबेत्
क्षीरं वा गुलनागरं मृगमद-
स्नेहश्च लेहं लिहेत् ॥ २१ ॥

बलाजीरकबिल्वाब्दवृषविश्वसुरद्रुमैः ।
गुडेक्षुलाजसहितैर्निष्क्वाथः श्वासकासहः ॥ २२ ॥

कासमर्दकवार्ताकवृषमार्कवजं घृतम् ।
तैलं खळो वा कासघ्नो व्योषजीरकसंयुतः ॥ २३ ॥

व्योषत्रिजातफलके सरपत्रमूल-
कर्पूरनागमरिचोत्थपरागमिश्रः ।
लेह्यो गुलेन दशमूलकषायसिद्धः
कासारुचिश्वसनपीनसनाशनश्च ॥ २४ ॥

श्वासेऽप्येवमिहातिवृद्धपवन-
श्लेष्मामदोषापह-
स्नेहस्वेदनशोधनानि विधिवत्
क्वाथश्च तैलं घृतम् ।
भृङ्गाद्यैर्दशमूलतश्च सुशृतं
रात्रौ पिबेच्छ्वासवान्
क्षीणे चोरसि च क्षतेऽपि च पिबे-
त्सर्पिर्विदार्यादिभिः ॥ २५ ॥

लाक्षातैलकृताभ्यङ्गः सन्धानार्थं क्षतोरसः ।
क्षीरमांसरसादीनि बृंहणानि समाचरेत् ॥ २६ ॥

हिध्मायामनिलानुलोमनविधिः
सन्त्रासहर्षादयः
श्वासोक्ताश्च कषायचूर्णगुळिका-
धूमस्तथा बृंहणः ।
श्वाविड्रोमभवो लिहेन्मधुकचू-
र्णं सर्पिषा स्नेहनं
कार्यं श्वासविधारणञ्च गुळिका
वातानुलोमान्यपि ॥ २७ ॥

कुर्याद्यक्ष्मणि बृंहणानि बलिनां
संशोधनं दीपनं
मन्देऽग्नौ क्वथितं घृतञ्च दशमू-
लाद्यैर्विदार्यादिभिः ।
सिद्धं शर्करया कफे तु मधुना
पेयं बलाद्यैः पयः
कासादौ तु भजेत्तमेव च विधिं
पथ्यानि मांसानि च ॥ २८ ॥

विदारिपञ्चाङ्गुलवृश्चिकाळी-
वृश्चीवदेवाह्वयसूर्यपर्ण्यः ।
कण्टकारीजीवनह्रस्वसंज्ञे
द्वे पञ्चके गोपसुता त्रिपादी ॥ २९ ॥

गण्डूषादिभिरास्यशुद्धिररुचौ
दोषेषु सर्पिः पयः
क्षौद्राढ्येन च सैन्धवेन मधुके-
न त्र्यूषणेन क्रमात्।
पेया चाम्रजविल्वपञ्चकरपू-
वैस्स्युः कषायाः खळः
शुण्ठ्या चाम्रसुगन्धिना शिरसि तै-
लक्षीरतक्रार्पणम् ॥ ३० ॥

अम्रपल्लवतद्वृन्तविल्वलाजार्द्रकेक्षुभिः ।
केसरैर्मातुलुङ्गस्य युक्तः क्वाथोऽरुचिं जयेत् ॥ ३१ ॥

बिल्वधान्यकवलामहौषधै-
र्लाजमुल्गसहितैः श्रृतं जलम् ।
छर्दिमाशु पिबतस्सशर्करं
हन्ति वातकफपित्तसम्भवाम् ॥ ३२ ॥

गन्धर्वहस्तचिरविल्वहुताशविश्व-
पथ्यापुनर्नवयवापकभूमितालैः ।
क्वाथः ससैन्धवगुलः पवनस्य शान्त्यै
वह्नेर्बलाय रुचये मलशोधनाय ॥ ३३ ॥

स्वरस्य सादेऽनिलजे तु सर्पिः
कोष्णं पयो वा दशमूलसिद्धम् ।
पित्ते सिताढ्यं शिशिरं कफे तु
व्योषं त्रिजातं मधुना लिहेच्च ॥ ३४ ॥

छर्द्यां वाय्वनुलोमनं पवनजे
क्वाथश्च बिल्वादिभिः
सामे दीपनपाचनार्थमुपवा-
सो वेगिनः स्तम्भनम् ।
सेकाद्यैर्ज्वरदोषभेदकथिताः
पेयादयः श्लेष्मणि
क्षीणे संग्रहणानुलोमनकरी
देया च संस्थापनी ॥ ३५ ॥

तृष्णायां वातपित्तघ्न्यः क्रियाः स्तम्भनबृंहणाः ।
सामायां वमनं मेहयक्ष्मिणां स्वस्वदोषवत् ॥ ३६ ॥

तर्कं मदघ्नन्त्वथ जीवनीयं
मूर्छायजित्सन्न्यसने यथास्वम् ।
दोषानुरूपं परिषेकनस्य-
क्वाथादिपानानि समाचरेच्च ॥ ३७ ॥

विड्वाताद्यनुलोमनं गुदजमां-
सानाञ्च संशोषणं
स्वेदालेपनधूपतः कफसमी-
रार्शस्सु कार्यं बहिः ।
अन्तः पाचनभेदनौषधकषा-
यस्नेहचूर्णादयः
चित्रामूलकुमारभद्रहुतभुग्-
भल्लातदन्त्यादिभिः ॥ ३८ ॥

स्निग्धां प्राग्वसयारनाललशुना-
द्यैः स्वेदयेल्लेपये-
द्गुञ्जाकिंशुकशिग्रुबीजलशुनै-
र्धूमः पलण्डुत्वचा ।

अर्शःक्षालनलेपनादिषु विशे-
षाद्रूक्षगन्धो हितः
स्नुक्पत्रैश्च तथारनालसलिलैः
पिष्टैर्वसाद्यैरपि ॥ ३९ ॥

पूतीकराजतरुपल्लववह्निपथ्या-
भल्लातसैन्धवकृतो मथिते खळश्च ।
क्षीरं हुताशसहितं सगुलं हुताशं
तत्सिद्धदुग्धदधितक्रघृतादयश्च ॥ ४० ॥

पित्ते शृतं क्षीरमनन्तयाब्दया
पेया तथा भर्जिततण्डुलैः कृता ।
रक्ते घृतं कौटचमूलसाधितं
ताटाकशुक्त्याप्यतिसारिणां हितम् ॥ ४१ ॥

वातार्शोविधिरुद्वर्ते सुकुमारघृतं पिबेत् ।
एरण्डतैलं सपटु गुदवर्तिश्च शस्यते ॥ ४२ ॥

दन्तीत्रिवृत्कषायश्च लशुनं स्वरसस्तथा ।
एरण्डतैलं सक्षीरमुदावर्तहरं परम् ॥ ४३ ॥

आमपाचनमथाग्निदीपनं
दोषकोपशमनं ज्वरोक्तवत् ।
संग्रहश्च परिशोषणं विश-
श्चातिसारविधयः समासतः ॥ ४४ ॥

सामानामतिसाराणामुपवासो यथाबलम् ।
लघ्वन्नपानपेयाश्च यथादोषं यथानलम् ॥ ४५ ॥

कार्यं दोषबलानुरूपमतिसा-
रेऽनन्तया साधितं
तक्रं वाम्बु च मुस्तया हपुषया
पाठाकलिङ्गौषधैः ।

सर्पिः सेव्यमथो विबन्धिनि वरा-
क्वाथः पयो दुर्बले
जीर्णे श्लेष्मणि तक्रमेव विबले
वेगे च संस्थापिनीम् ॥ ४६ ॥

रक्तातिसारे रक्तार्शोरक्तपित्तविधिर्भवेत्
अजापयो मोचरसं विशेषेण प्रयोजयेत् ॥ ४७ ॥

ग्रहण्यामतिसारोक्ताः क्रियाः कार्या विशेषतः ।
अग्नेर्यथा स्यात्समता दीपनश्चानुलोमनम् ॥ ४८ ॥

विषमे सर्पिषः पानं तीक्ष्णे क्षीरं सितान्वितम् ।
पिबेच्चूर्णांश्च मन्देऽग्नौ व्योषचित्रकपूर्वजान् ॥ ४९ ॥

सैन्धवजीरकदीप्यककृष्णा-
शुण्ठीचूर्णाः क्रमवृद्धास्तैः ।
पथ्याचूर्णैस्सहितास्तुल्यै-
स्सेव्या दीपनपाचनसुभगाः ॥ ५० ॥

कृच्छ्रेषु पित्तपवनात्मसु मूत्रवृद्ध्यै
क्वाथं पिबेल्लघु तृणात्मकपञ्चमूलैः ।
सक्षीरमाज्यमपि तैर्मधुराश्च पेयां
केराम्बुनाज्यतिलकैरभिषेचयेत्तम् ॥ ५१ ॥

वातश्लेष्मसु दाशमूलसलिलं
पेयश्च धान्याम्लतः
स्वेदः केरजनिम्बतैलवसया-
भ्यङ्गो व्यवायादयः ।
कार्या ह्यश्मभवामयेष्वपि नवे-
ष्वेवन्त्वशान्ते भिषक्
शस्त्रेणामयमाहरेन्निपुणधी-
रापृच्छ्य वैद्येश्वरम् ॥ ५२ ॥

शुक्तिक्षारप्रसन्नाम्बु पिबेत्तैलसमन्वितम् ।
नाभिमूले तथा लिम्पेत्सद्यो मूत्रप्रवृत्तये ॥ ५३ ॥

मेहे स्तम्भनमुक्तमेव बलिनां
संशोधनं मेदसो
मूत्रस्यापि विशोषणं गुलिकया
स्थूले कृशे सर्पिषा ।
श्रेष्ठा गैरिकवेरिचन्दननिशा-
कान्तैरुशीरसिद्धया
वाशानिम्बपटोलशिग्रुबृहती-
च्छिन्नोद्भवासर्पिषा ॥ ५४ ॥

धान्वन्तरं गुल्गुलुतिक्तकं घृतं
नीरूरिपूर्वा गुलिका निशादिजः ।
क्वाथः प्रमेहेषु हितः खळश्च
धात्रीनिशोत्थस्तृषि खादिराम्भः ॥ ५५ ॥

मेहजासु पिटकासु मेहव-
च्छीतलेपपरिषेचनादयः ।
रक्तपित्तविहिताः कषायपे-
यादयश्च बलिनां विशोधनम् ॥ ५६ ॥

---

१. एतत्पूर्वमादर्शे

നിശാകതകനെല്ലിക്കാതെച്ചിപാച്ചോററിശോചികാ
ഏകനായകരാമച്ചമേദി: കഷായം പ്രമേഹഹം.

നീരുരിവൈരിതെള്ളിത്തുകപ്പുള്ളിക്കരുത്താൽ
മുക്കാവിള്ളാർപശയുമാമ്പലരി സകാന്താ.
ചെമ്മണ്ണ് നിശാഭയഹിമഭയമത്തിനീരിൽ
സപ്പാംഠപിഷ്ടമിതു മേഹഗണം ഭിനത്തി

इति श्लोकद्वयं कैरल्यां दृश्यते । तद्ग्रन्थघटकं प्रक्षिप्तं वेति चिन्तनीयम् ॥

एकानना बहुमुखाः पिटकाश्च तासा-
मुत्पत्तिकालकृतशोधनतोऽल्पता स्यात् ।
शीतप्रलेपपरिषेचनतोऽल्पपाकः
पक्वे व्रणोक्तविधयः परिषेचनाद्याः ॥ ५७ ॥

कार्या वृद्धिषु शोफवद्बहिरिह
स्वेदप्रलेपादयो
रेको यक्षदगङ्कुरोद्भवखल-
श्चान्त्रामये पाचनी ।
देया वा गुलिका सहिङ्गुपटुवि-
श्वैरण्डतैलं पिबे-
न्मेदोमूत्रमये तयोः प्रतिविधि-
र्दाहादयः स्वोक्तवत् ॥ ५८ ॥

गन्धर्वहस्तादिकषायपानं
सैरण्डतैलं सुकुमारसर्पिः ।
तैलं सनीलीरससाधितञ्च
धान्वन्तरं वा हितमान्त्रवृद्धौ ॥ ५९ ॥

विद्रधौ तु पिटकोक्तवत् क्रिया
बाह्य आभ्यन्तर इहात्मशोधनम् ।
निम्बपूर्वसलिलं पिबेद्घृतं
तिक्तकञ्च हितमत्र कुष्ठवत् ॥ ६० ॥

गुल्मे श्लेष्मसमीरजे तु हतना-
मोक्ता बहिः स्युः क्रियाः
पेयं साधितसप्तसारसलिलं
गन्धर्वहस्तादिजम् ।

सर्पिर्वा सुकुमारमिश्रलशुन-
क्षारादिभिः साधितं
चूर्णं वा गुलिका शकृत्प्रतिहते
वर्तिर्विरेको हितः ॥ ६१ ॥

वर्षाभूबिल्वखल्वोरुपुसहचरशु-
ण्ठ्यग्निमन्थैः कषायः
पातव्यः सप्तसारो गुलवणकणा-
हिङ्गुमिश्रो यथावत् ।
विड्बन्धं वह्निमान्द्यं रुजमतिमहतीं
बस्तिहृत्कुक्षिपृष्ठ-
श्रोणीदेशेषु सद्यश्शमयति जठरा-
ष्ठीलगुल्मप्लिहांश्च ॥ ६२ ॥

हिङ्ग्वादिचूर्णं सुकुमारसर्पि-
र्वातात्मके क्षारयुतः कफोत्थे ।
कल्याणकक्षाररजः पुराण-
किट्टादिसिद्धं लशुनादिसर्पिः ॥ ६३ ॥

किट्टं कान्तमथाभ्रिचिञ्चभसित-
ञ्चार्द्रं रसं गन्धकं
द्व्यकार्धाङ्घ्रिमितं तदङ्घ्रिदशभा-
गे च क्रमात् पेषयेत् ।
भृङ्गीमोटकळञ्चिकिंशुकविळाल्
नीर्वीलत्ति मुन्नाळर-
च्चुण्टाकुं गुलिकोदरामयहरी
नाम्ना स्मृता पाचनी ॥ ६४ ॥

त्रिकटुकमजमोजं सैन्धवं जीरके द्वे
समचरणधृतानामष्टमो हिङ्गुभागः।
प्रथमकवलभोज्यः सर्पिषा चूर्णकोऽयं
जनयति जठराग्निं वातगुल्मञ्च हन्ति ॥ ६५ ॥

पैत्ते विदार्यादिशृतं घृतञ्च
धात्र्यादि वा रक्तभवे स्वकाले।
रक्तस्य संशोधनमुष्णतीक्ष्णैः
पीतैश्च योनौ निहतेर्यथास्वम् ॥ ६६ ॥

कृष्णाशताह्वाद्विकरञ्जदारु-
भार्ङ्गीकुलत्थैर्विहितः कषायः।
तथा रसोऽनेन च सिद्धमम्भः
सहिङ्गुविश्वं हितमस्रगुल्मे ॥ ६७ ॥

शूले तु गुल्मविहिताश्च कषायमुख्याः
स्वेदादयोऽम्लभसितं हुतभुग्ग्रहश्च।
क्षीरं पलाशसुशृतञ्च तथाम्लभस्म-
स्फोट्याभुजङ्गसुशृतं हविराष्णसर्पिः ॥ ६८ ॥

कुक्षौ विरेको विधिवद्विशुद्धे
संशोषणायाज्यरसायनादि।
सेव्यं प्रयोज्या गुदवर्तयश्च
बद्धोदरे क्षारविषे स्वशक्त्या ॥ ६९ ॥

पाण्ड्वामयेऽमलवराब्जपुनर्नवालि-
जम्बीरहस्तिदलकर्णविलङ्गपाठाः।
शुण्ठीनिशातिलबलानलपिप्पलीभि-
स्तक्रं घृतञ्च सुशृत वृषपञ्चगव्यम् ॥ ७० ॥

वातोत्थे दशमूलसिद्धसलिलं
पेयञ्च विल्वार्धकं
पैत्ते रेचनमुत्तरामृतजलं
चूर्णश्च भद्राह्वयः ।
शोफे श्लेष्मभवे तु भस्मकृतपे-
याम्लोत्थपञ्चाङ्गतै-
लाभ्यङ्गो भसितोदितौषधभृतं
स्नानाम्बु तैलं हितम्[1] ॥ ७१ ॥

विलङ्गसारामलकाभयानां
पलं पलं त्रीणि पलानि कुम्भात् ।
गुलस्य च[2] द्वादश मासमेष
जितात्मना[3] हन्त्युपयुज्यमानः ॥ ७२ ॥

कुष्ठश्वित्रश्वासकासोदराशों-
मेहप्लीहग्रन्थिरागन्तुगुल्मान् ।
सिद्धं योगं यक्षो मुमुक्षो-
र्भिक्षोः प्राणान्माणिभद्रः किलेमम् ॥ ७३ ॥

वीसर्पेषु विरेचनञ्च वमनं
संशोषणं श्लेष्मजे
निम्बाद्यम्बु पिबेत् षडङ्गममृता-
सिद्धञ्च पित्तास्रजे ।

---

१. एतत्परम् ।
പനവിരൽകടലാടിമുള്ളിരംഭാ
ഭസിതനാമെതജലെന പാലിനാലും
അഴകിലിതു നിഹന്തി കഞ്ഞി ശോഫം
ഹരിഹരയോരിവ കല്മഷം പ്രസനഃ
इति कैरल्यामादर्शे । २. षड्द्वादश भाग एष । ३ नां

वातोत्थे दशमूलजं खदिरजं
सर्वत्र पक्वे यथा-
दोषं क्षालनमार्जनादिशतधौ-
ताज्यश्च पित्तेऽधिके ॥ ७४ ॥

कुष्ठेऽस्रस्रुतिरेचनञ्च वमनं
शस्तं पिबेत्तिक्तकं
सर्पिस्तौरवतैलपोत्रिभुजगो-
त्थं वा स्वदोषोचितम् ।
चूर्णो गन्धकळो रसायनविधि-
श्चाभ्यञ्जने तौरवं
कण्डूदाहरुगादिषु स्वविहिता-
लेपस्तथाभ्यञ्जनम् ॥ ७५ ॥

गुल्गुलुमरिचविलङ्गै-
स्सर्षपकासीसकुष्ठकम्पिल्लैः ।
द्विनिशासूर्यलताढ्यैः
स्नेहः क्रिमिजिन्मलोचितैर्लेपः ॥ ७६ ॥

अन्तः क्रिमिघ्नं लशुनं सहिङ्गु-
हिङ्ग्वष्टकं सर्षपहिङ्गुसर्पिः ।
वकुण्ठमूलं कुसुमञ्च वह्निः
पेया च तैरर्भककेतकीभिः ॥ ७७ ॥

वातश्लेष्मविचर्चिकासु पयसा
तैलेन वा लेपनं
कार्पासद्विकरञ्जजेन रजनी-
श्रेष्ठा त्रिवृत्स्नेहतः ।

पित्तास्रे शतधौतजेन हविषा-
लाक्षाज्यसन्माक्षिकै-
श्रूतोत्थेन रसेन सिद्धहविषा
सन्माक्षिकाढ्येन च || ७८ ||

चन्दनाखुविषालेपः कुष्ठघ्नश्च किलासजित् ।
वरावसाटिकाभिर्वा जम्बीरसलिलैस्तथा || ७९ ||

वातास्रे तु पङ्कजामृतबला-
क्वाथं पिबेच्छोधये-
द्रक्तं क्षीरबलाबलादिश्रृततै-
लाज्येन चाभ्यञ्जनम् ।
पेयं तत्पवनेऽधिके तु रुधिरे
कारस्कराज्यं बला-
सिद्धं वा जलसर्जसिद्धहविर-
भ्यङ्गश्च कार्यस्तथा || ८० ||

वातोपक्रम उक्त एव हि बला-
सिद्धं पयो वा जलं
तैलं वा दशमूलकश्च सघृतं
सिद्धं विदार्यादिभिः ।
पेयं वायुविमर्दनश्च सकफे
धान्वन्तरं वा बहिः
सेकाभ्यङ्गमुखाश्च तैः सहचरा-
द्यं वा कषायं पिबेद् || ८१ ||

सहचरं सुरदारु सनागरं
क्वथितमम्भसि तैलविमिश्रितम् ।
पवनपीडितदेहगतिः पिबेद्-
द्रुतविलम्बितगो भवतीच्छया || ८२ ||

मरुता वचसि निरुद्धे
शिरसि गुरुं न्यस्य रोगिणो भारम् ।
भ्रमयेदितस्ततस्तं
श्रमाय संस्विन्नसर्वाङ्गम् ॥ ८३ ॥

भेषजानि च कर्माणि यानि कानिचिदात्मना ।
ज्ञातानि लिखितान्यत्र शास्त्रतोऽन्यानि चादिशेत् ॥ ८४ ॥

उच्यन्तेऽन्यानि चाङ्गान्यथ विकृतमला
व्याधयोऽप्यौषधानि
ज्ञेयान्यत्र व्रणस्तु द्विविध इह सश-
ल्यो विशल्यश्च शल्यम् ।
उद्धृत्य क्षालनालेपनपिचुपरिषे-
कादयः स्वैः कषायैः
कल्कैः स्नेहैश्च कार्या निजविधिविहित-
क्षालनाद्या विशल्ये ॥ ८५ ॥

वातव्रणे तु दशमूलजलैर्विशुद्धिः
पित्तास्रजे पटमुखोदकतः कफोत्थे ।
आरग्वधादिसलिलैः परिलेपनानि
दोषोचितानि कफजे द्रुतगन्धकादि ॥ ८६ ॥

शोफे व्रणे वातकफात्मके तु
स्वेदश्च पिण्डैरुपनाहनञ्च ।
पैत्ते सरक्ते शतधौतलेपो
यष्ट्याह्वकारस्करतोयसेकः ॥ ८७ ॥

गोपात्मजामधुकचन्दनसेव्यकुष्ठ-
क्षीरीन्दुमाङ्कुरबिसोत्पलकन्दगर्भम् ।
दूर्वारसे जयति साधितमाज्यमाशु
क्षीरेण पित्तरुधिरव्रणशोफरोगान् ॥ ८८ ॥

जातीनिम्बपटोलशिग्रुसुषवी-
मायूरिकाभद्रिका-
निर्गुण्डीमृदुकुञ्चिकाकटुकिका-
दूर्वानिशानां रसे ।
स्नेहः साधित आशु हन्ति कफजान्
दुष्टव्रणादीन्यथा-
दोषं क्षारविलेपनाग्निजनिते
चोपोदकास्त्रीशतैः ॥ ८९ ॥

छिन्ने भिन्ने च भग्ने वपुषि निजनिज-
स्थानमायोज्य सम्य-
ग्बध्वा सेकादि कुर्याद्यदि तु निपतिते
शेषगात्राणि रक्षेत् ।
नालीग्रन्थ्यर्बुदश्लीपदभगगुदज-
क्षुद्रगण्डामयानां
बाह्यान्तः कुष्ठदुष्टव्रणविधय इह-
स्थानमर्मानुरूपाः ॥ ९० ॥

ऊर्ध्वाङ्गेऽपि च दोषभेषजगणा-
स्ते चेतनास्थानह-
ङ्नासाकर्णमुखेषु शीर्षिण च विशे-
षाच्चेतनारक्षणम् ।
कुर्याच्छेदनभेदलेपनजलौ-
कः क्षारदाहादयः
कार्या वातकफात्मकेऽत्र बहुमां-
सेऽस्रे च तच्छोधनम् ॥ ९१ ॥

वाताद्वर्त्मनि भेषकृच्छ्रतमकः

पित्तेन शीतोषदः

श्रोतिक्लिष्ट कफजश्च पोत्थलमणः

श्रोत्थिक्लिष्टमुत्सङ्गकम् ।

शक्तादञ्जनकार्शसी च बिसमुत-

क्लिष्ट मलः कर्दम-

श्यावक्लिष्टकुकूणरोधबहुला-

लज्यर्बुदं सैकतम् ॥ ९२ ॥

आद्योऽत्र भैषजैस्साध्यो द्वौ ततोऽशश्च वर्जयेत् ।

शस्त्रेण शेषास्साध्यास्स्युरेकविंशतिरामयाः ॥ ९३ ॥

वर्त्मसन्धिसितकृष्णदृष्टिस-

र्वाक्षिगामयगणान् विरोधिनः ।

लेपनांस्तु सुरतोयसम्मतान्

नेत्रवासिन इति द्विधाचरेत् ॥ ९४ ॥

हृद्रोगेष्वथ पित्तजेषु सपयो-

दूर्वारसैः सेचनं

शीर्षे वा दृशि वा यथामलमिहा-

भ्यङ्गो त्रिलाळो वहिः ।

लाक्षागैरिकचन्दनामृतवरा-

यष्टीप्रलेपौषधं

सर्पिर्मारुतजे च शिग्रु मधुना

श्लेष्मामये नेत्रगे ॥ ९५ ॥

तटाकशुक्त्या शृतमज्यमाशु
दृगामयघ्नं शबरीरसश्च।
सर्पिर्निशान्धस्य हितं वरा च
सर्वाक्षिरोगेषु बहिस्तथान्तः ॥ ९६ ॥

दार्व्युत्तमामधुकसाधितकेरतोयैः
सेको घृतेन पिचुलेपनमक्ष्णि शस्तम्।
सर्पिः पटोलमुखतो विमलाञ्जनञ्च
संशोधनञ्च पदयोर्घृतलेपनञ्च ॥ ९७ ॥

नासाकर्णमुखामयाश्च कफजा-
स्तान् नस्यधूमादिभि-
र्गण्डूषैः शमयेत्तदाश्रयशिरो-
रोगेऽभ्यङ्गसेकादिभिः।
तन्मूलं वपुषस्तदाश्रयतया रक्षे-
द्विशेषाच्छिरः
सर्वव्याधिषु सेचनानि शिरसो
वृक्षादिमूले यथा ॥ ९८ ॥

बालानां दोषदूष्याश्च व्याधयो भेषजानि च।
मात्रा कानीयसी तेषां योज्या मृदुशरीरिणाम् ॥ ९९ ॥

दैवताविषतन्त्रोक्ता भूतसर्पविषक्रिया।
रसायनानि वृष्याणि जराबीजचिकित्सितम् ॥ १०० ॥

भेषजानि सुविज्ञेयान्यष्टाङ्गहृदये नृणाम्।
मनोऽनया विशत्यस्मिन्नित्येषा पद्धतिः स्मृता ॥ १०१ ॥

एषा पद्धतिरच्युताश्रयतया
वाणी सतां सम्मता
दोषघ्नी च भवेन्नृणामविदुषां
कर्मप्रकाशात्मिका ।
विद्वद्भिः स्वजनोपदेशसमये
संशोध्यमाना पुनः
स्वार्थालाभतयार्थसाधनतया
त्याज्या न पूज्या जनैः ॥ १०२ ॥

इति पुरुषोत्तमविरचितायां भेषजपद्धत्याम्
उपक्रमखण्डः
भेषजपद्धतिस्समाप्ता